Takshashila Project

। पुरश्चरणक्रमलाघवप्र॰ पत्र ५

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

ःसूक्तस्य॥ह॥दि॥ ॐ॥ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य
न्त्या त्रिष्टुप्॥ शिष्टा अनुष्टुभः अन्त्यस्य महत्त्वादित्येन सतत्वेन नारायणो नाम ऋषिः
पुरुषो देवता॥ चित्त्वा ... सौवरागतिर्दिष्टादि ... नित्तुष्ट ... दुः स देवता॥ तथा चानुक्रं
सहस्रशीर्षा षोडश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तत्त्विति गतो विनियोगः
शौनकः॥ सहस्रशीर्षा सूक्तं त्रिवारं चाहर्निशं॥ विष्णुरादिः सर्वदेवानां सर्वं
लभेत॥ तत्र प्रथमा॥ सहस्रशीर्षेति॥ सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विरा
ट्पुरुषः सोऽयं सहस्रशीर्षा। सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इ
त्यर्थः॥ यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सह
स्रशीर्षत्वं॥ एवं सहस्राक्षत्वं सहस्रपात्त्वं च॥ स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां सर्व

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

य तः सर्वतो वृत्वा परिवेष्ट्य दशांगुलपरिमितं देशं मत्यतिष्ठत्॥ अतिक्रम्य
व्यवस्थितः॥ दशांगुलमित्युपलक्षणं॥ ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्य

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठ
द्दशांगुलं॥१॥ ॥सहस्रऽशीर्षा। पुरुषः। सहस्रऽअक्षः। सहस्रऽपात्।
भूमिं। विश्वतः। वृत्वा। अति। अतिष्ठत्। दशऽअंगुलं। १॥

अथ द्वितीयां॥ पुरुष एवेति॥ यदिदं वर्तमानं जगत्तत्सर्वं पुरुष एव॥ यच्च भूतं
जगत् यच्च भव्यं भावि यज्जगत् तदपि पुरुष एव यथा अस्मिन्कल्पे वर्तमाना
देहाः सर्वेपि विराट्पुरुषस्यावयवाः तथैवातीतानागामिनोरपि कल्पयो

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

पिचअमृतत्वस्यदेवत्वस्यायमीशानःस्वामीयद्यस्मात्कारणात्त
न्प्राणिनामन्नेन[illegible]भोग्येननिमित्तेनअतिरोहतिस्वकीयांकारणाव
स्थामतिक्रम्यपरिदृश्यमानांजगदवस्थांप्राप्नोतितस्मात्प्राणिनांकर्मफलभो

पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं।उतामृतत्वस्येशानोयदन्नेनातिरो
पुरुषः।एव।इदं।सर्वं।यत्।भूतं।यत्।च।भव्यं।उत।अमृतऽत्वस्य।ई
शानः।यत्।अन्नेन।अतिऽरोहति॥२॥

गदवस्थास्वीकारान्नेदंतस्यवस्तुतत्त्वमित्यर्थः॥अपतत्तो[illegible]
ऽतीतानागतवर्तमानरूपंजगद्यावदस्तितावान्सर्वोऽपिअस्यपुरुष
महिमास्वकीयसामर्थ्यविशेषः।नतुतस्यवास्तवंस्वरूपं।वास्तवस्तुपुरुषः[illegible]

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

म्नोऽपि ज्यायान् अतिशयेनाधिकः तथोभयं स्पष्टीक्रियते अस्य पुरुषस्य विश्वा
णि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः चतुर्थांशः अस्य पुरुषस्या
वशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशरूपे व्यव

एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्या
मृतं दिवि ॥ एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पूरुषः । पादः । अस्य ।
विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतम् । दिवि ॥ ३ ॥

ष्ठत इति शेषः ॥ यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य परब्रह्मण इयत्ता
भावात्पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाऽल्पमि
ति विवक्षितत्वात्पादत्वोपन्यासः ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

माह । अथ त्रिपादूर्ध्व इति ॥ योयं त्रिपात्पुरुषः संसारस्पर्शरहितः ब्रह्मस्वरूपः सोयमस्मात् अज्ञानकार्यात्संसाराद्बहिर्भूतैरत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् तावत् सोयं पादो लेशः सोयमिह मायायां पुनरभवत् सृष्टिसंहाराभ्यां पुनः पुनरागच्छति ॥ अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥ त्रिपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति ॥ ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इति साशन अनशने । अभि ॥ ४ ॥

ततः मायायामागत्यानन्तरं विष्वङ् देवतिर्यगादिरूपेण विविधः सन् व्यक्रामत् ॥ किं कृत्वा ॥ साशनानशने अभिलक्ष्य साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातं लक्ष्यते ॥ अनशनं तद्रहितमचेतनं गिरिनद्यादिकं तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानि

व्यक्रामत् व्याप्तवान्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

र्थस्य प्रकाशेन तमोराशिं निवारयन्॥ पुमर्थं चतुरो देवाद्धिया तीर्थमहेश्वरः॥ अ
नाद्विराडिति। विश्वरूपकामोऽदितियद्रूपं तदेवात्र प्रपंच्यते॥ ॥तस्माद्विराडित्युरुपान्वयि
ब्रह्मांडदेहोऽजायत अतः॥ विविधानि राजंते वस्तून्यत्रेति विराट्॥ विराजो अधि
तस्माद्विराडजायत विराजो अधि पूरुषः॥ स जातो अत्यरिच्यत पश्चाद्भूमिम
थो पुरः॥५॥ वर्ग १७॥ तस्मात्॥ विराट्॥ अजायत॥ विराजेन अधिपुरुषः॥ सः॥
जातः॥ अति॥ अरिच्यत॥ पश्चात्॥ भूमिं॥ अथो इति पुरः॥१४॥ वर्गो १७॥
ट्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित्पुमानजायत॥
यं सर्ववेदांतवेद्यः परमात्मा स एव स्वकीयया मायया विराड्देहं ब्रह्मांडरूपं सृष्ट्वा तत्र जीव
रूपेण प्रविश्य ब्रह्मांडाभिमानी देवतात्मा जीवोऽभवत्॥ एतच्चाथर्वणिका उत्तरतापनी
रूपमामनंति॥ स वा एष भूतानींद्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

...हस्त्मारस्येयपेवेति॥ सजातोविराट्पुरुषो अत्यरिच्यत अतिरिक्तोभूत् तद्विराड्
रिक्तो देवतिर्यङ्मनुष्यादिरूपोभूत् पश्चात् देवादिजीवभावाद्ध्वं भूमिं ससर्जेति
वः अथो भूमेः सृष्टेरनंतरं तेषां जीवानां पुरः ससर्ज नीपर्यं ते समभिधीतुमिति पुरः
णि॥ इत्यष्टमस्य चतुर्थे सप्तदशो वर्गः॥ अथ षष्ठी॥ यत्पुरुषेणेति॥ यद्देवाः पुरः
मत्पुरुषेण हविषा देवा यज्ञमतन्वत॥ वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः
शरद्धविः॥ यत्। पुरुषेण। हविषा। देवाः। यज्ञं। अतन्वत। वसंतः। अस्य। आ
सीत्। आज्यं। ग्रीष्मः। इध्मः। शरत्। हविः॥ १४

यदा शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरंतरासंभ
पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम
अन्वतिष्ठन् तदानीमस्य यज्ञस्य वसंतो वसंतर्तुरेव आज्यमासीत् आज्यत्वेन
तवेन इत्यर्थः॥ ८॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

न्तो ग्रीष्म इध्म आसीत् तन्मनसैव इध्मत्वेन संकल्पितवंतः। तथा शरद्धविरासीत् तमे
डाशादिरूपेण संकल्पितवंत इत्यर्थः। एवं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पनं अनं
तरं वसंतादीनां आज्यादिविशेषरूपत्वेन संकल्पितं इति द्रष्टव्यं॥ ॥अथ सप्तमी॥ तं यज्ञं
॥ यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रोक्षि

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः॥ तेन देवा अयजंत साध्या ऋषयश्च ये॥७॥
तं। यज्ञं। बर्हिषि। प्र। औक्षन्। पुरुषं। जातं। अग्रतः॥ तेन। देवाः। अयजंत। साध्याः।
ऋषयः। च। ये। १४॥

॥ कीदृशमित्याह॥ अग्रतः सर्वसृष्टेः पूर्वं पुरुषत्वेन जातं पुरुषत्वेनोत्पन्नं एतच्च प्रागेवोक्तं।
तस्माद्विराळजायत विराजो अधि पूरुष इति॥ तेन पुरुषरूपेण पशुना देवा अयजंत मानसं
यागं निष्पादितवंत इत्यर्थः॥ के ते देवा इत्यत आह॥ साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्र

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

रंतुषु ला ऋषयो मंत्रद्रष्टार ऋ ये संति ते सर्वे व्ययजंत इत्यर्थः॥ ॥अथाष्टमी॥
नोयस्ताद्दिति॥ सर्वहुतः सर्वात्मकः पुरुषो यस्मिन्न्यज्ञे हूयते सोयं सर्वहुतः॥ तादृशा
न्तस्त्रवेक्षि। तस्मान्मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं संभृतं संपादितं॥ दधि चाज्यं चे
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं॥ पशून्तांश्चक्रे वायव्यानारण्यान्ग्रा
म्याश्च ये॥८॥ तस्मात्। यज्ञात्। सर्वऽहुतः। संऽभृतं। पृषत्ऽआज्यं॥
तान्। चक्रे। वायव्यान्। आरण्यान्। ग्राम्याः। च। ये॥८॥
इभोग्यजातं संपादितमित्यर्थः॥ तथा वायव्यान् वायुदेवताकान् लोकप्रसिद्धान् आ
न्पशूंश्चक्रे उत्पादितवान् आरण्यान् हरिणादयः। ग्राम्याश्च ये गवाश्वाद
न्पि चक्रे॥ पशूनामंतरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते॥ वायव्याः
तावायुर्वा अंतरिक्षस्याध्यक्षः॥ अध्यक्षो अंतरिक्षदेवत्याः खलु वै पशवः वायवस्थेति

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नवनी॥ तस्माद्यज्ञात्॥ सर्वहुतः तस्मा ऋचौ का प्रश्ना न ऋचः सामानि जज्ञिरे॥
भाः॥ तस्माद्यज्ञात् छंदांसि गायत्र्यादीनि जज्ञिरे॥ तस्माद्यज्ञात् यजुः अजायत॥
रास्नी॥ तस्मात् अश्वा इति॥ तस्मात् यज्ञात् अश्वा अजायंत उत्प भाः॥ ये केचन
न [illegible] यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छंदांसि जज्ञिरे तस्माद्यजुस्तस्मा
दजायत॥९॥ तस्मादश्वा अजायंत ये के चोभयादतः। गावो ह जज्ञिरे तस्मा
त्तस्माज्जाता अजावयः॥१०॥ ऋचः सामानि जज्ञिरे। छंदांसि ज
ज्ञिरे। तस्मात् यजुः तस्मात् अजायत॥९॥ तस्मात् अश्वाः अजायंत
ये के च उभयादतः गावः ह जज्ञिरे तस्मात्। तस्मात् जाताः अजा अवयः॥१०
न्ति रेकाग र्दभा अश्व [illegible] उभयादतो भाग योः उभ दो र्गउ काः संति तस्मा
यंता तथा तस्माद्यज्ञात् गावो अजायंत तस्माद्यज्ञात् अजा अवयश्च जाताः

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

…दर्शौ ॥ यत्पुरुषमिति ॥ पुरुषो नररूपेण प्राणिना निसृष्टिवन्तं प्रत्ययादेनं
…ऽउच्यते ॥ प्रजापतेः प्राणरूपाः देवाः यत्पुरुषं विराडू व्यदधुः ॥ हे कल्पेनो
…न वंतः ॥ तत्तानी कतिधा कानिभिः प्रकारैः व्यकल्पयन् ॥ तिनिर्ध कल्पितवंतः ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्य को बाहू का उ
रू पादाऽउच्येते ॥ ११ ॥ १ ॥ यत्पुरुषं व्यदधुः कतिधा वि अ
कल्पयन् । मुखं किं अस्य को बाहू इति । कौ ऊरू इति पादा उ
च्येते इति ॥ १६ ॥
पुरुषस्य मुखं किमित्यादिना विशेषविषयाः प्रश्नाः ॥ ॥ ॥ ६ ॥ ॥ ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

शो॥ ब्राह्मणोस्येति॥ इदानीं पूर्वोक्तप्रश्नानामुत्तराणि दर्शयति॥ अस्य प्रजापतेर्ब्राह्मणत्व
जातिविशिष्टः पुरुषो मुखमासीत् मुखादुत्पन्न इत्यर्थः॥ योयं राजन्यः क्षत्रियत्वजातिमान्
बाहू कृतः बाहुत्वेन निष्पादितः बाहुभ्यामुत्पादित इत्यर्थः॥ तत्तदानीमस्य प्रजापतेः यद्यदू
वैश्यः संपन्न ऊरुभ्यामुत्पन्न इत्यर्थः॥ तथा अस्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान्पुरुषो

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां
शूद्रोऽअजायत॥१२॥ ब्राह्मणः। अस्य। मुखं। आसीत्। बाहू इति। राजन्यः।
कृतः। ऊरू इति। तत्। अस्य। यत्। वैश्यः। पत्ऽभ्यां। शूद्रः। अजायत॥१२

यं तु मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकांडे स मुखतस्त्रिवृतं
स्माद्दैवि स्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये॥ ॥१२॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

...तीध चंद्रमा इति॥ यथा रथ्या ज्यादि इव्यादि गव्याश्च: पशवः अंगादिचेरा: ...लादयो
...तस्मादुत्स्रा एवं चंद्रादयो देवा अदितस्मादेवोत्पन्ना इत्याह॥ प्रजापतेर्वै मनसः सो।

चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत॥ मुखादिंद्रश्चाग्निश्च प्रा
णाद्वायुरजायत॥१३॥ चंद्रमाः। मनसः। जातः। च। क्षोः। सूर्यः। अजायत।
मुखात्। इंद्रः। च। अग्निः। च। प्राणात्। वायुः। अजायत॥१४॥

चंद्रमा वै जातः चक्षोः चक्षुषः सूर्यो प्यजायत। अस्य मुखादिंद्रश्चाग्निश्चसो वायु
श्च प्राणाद्वायुरजायत॥ ॥१३॥ ॥ ॥ ॥ ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

तुर्दशी॥ नाभ्या आसीदिति॥ यथा चंद्रादीन् प्रजापतेः मनः प्रभृतेः तथा कल्पयन् तथा
दीन् लोकान् प्रजापतेर्नाभ्यादयो वयवा अकल्पयन् उत्पादितवंतः॥ एतमेव दर्शयति

नाभ्याऽआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रो
त्रात्तथा लोकाँऽअकल्पयन्॥१४॥ नाभ्याः। आसीत्। अंतरिक्षं। शीर्ष्णः।
द्यौः। सं। अवर्तत। पत्ऽभ्यां। भूमिः। दिशः। श्रोत्रात्। तथा। लोकान्। अ
कल्पयन्॥१४॥

यं प्रजापतेर्नाभेरंतरिक्षमासीत्। शीर्ष्णः शिरसो द्यौः समवर्तत उत्पन्ना॥ अस्य पद्भ्यां
भूमिरुत्पन्ना। अस्य श्रोत्राद्दिश उत्पन्ना इति॥ अथ पंचदशी॥ ॥ ॥ ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

...स्मिन्निति॥ अ[illegible]ल्पितस्य यज्ञस्य गायत्र्यादीनि सप्त छंदांसि परिधयः
[illegible]हवनीयस्यैव त्रयः परिधयः उत्तरवेदिकायां त्रयः आदित्यश्च सप्तमः परिधिः प्रतिनिधि
अत एवाम्नायते॥ पुरस्तादादित्य[illegible]आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहंती
[illegible]ते आदित्यसहिताः सप्त परिधयोत्र सप्त छंदो रूपाः तथा समिधः[illegible]गुणिताः
[illegible]ता॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्
पुरुषं पशुं॥ सप्त। अस्य। आसन्। परिऽधयः। त्रिः। सप्त। सम्ऽइधः। कृताः।
देवाः। यत्। यज्ञं। तन्वानाः। अबध्नन्। पुरुषं। पशुं॥ १५॥ ॥ ॥ ॥
[illegible]या का एकविंशतिः कृताः॥ द्वादश मासाः पंचर्तवः त्रय इमे लोकाः असावादित्य एकविंश
[illegible]एताः॥ एकविंशतिदारुयुक्ते इध्मत्वेन भाविताः यत् यः पुरुषो वैराजोस्ति तं पुरुषं दे
[illegible]न्द्रियरूपाः यज्ञं तन्वानाः मानसे यज्ञे [illegible]अबध्नन् वैराजं पुरुषमे

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

यबोऽकरो॥ यज्ञेन यज्ञमिति॥ सर्वं प्रपंचेनोक्तमर्थः संक्षिप्याऽत्र दर्शयति॥ देवाः प्रजाप
प्राणरूपाः यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमय
जित पूजितवंतः। तस्मात् पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धा
रकाणि प्रथमानि मुख्यानि भूतान्यासन्॥ एतावताऽन्वित प्रतिपादितस्तस्योक्तमाम
यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमा
नः सचंत यत्र पूर्वे साध्याः संति देवाः॥१६॥ वर्ग १९ ॥ यज्ञेन। यज्ञं। अयजंत।
देवाः। तानि। धर्माणि। प्रथमानि। आसन्। ते। ह। नाकं। महिमानः। सचंत।
यत्र। पूर्वे। साध्याः। संति। देवाः॥१६॥ ॥वर्ग॥१९॥ ॥ ॥
गृहीतः॥ अथो [illegible] तोपलानुवादकभागार्थः संगृह्यते॥ यत्र यस्मिन् विराट्

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.

Takshashila Project

नारूपेनाके सर्वे [illegible] साः पुरातनाविराट् पार्थिवसाधकादेवाः संतितृ
केविराट् प्राणत पंचवर्गे ते महिमानः तदुपासकाः महात्मानः सचं
नवखंति प्राप्नुवंति ॥ इत्यष्टमस्य चतुर्थे [illegible] नविंशो वर्गः ॥ ॥ ॥
मे १० इत्यष्टमे मंडले ७ सप्तमोनुवाकः ॥ संवत ॥ १८६७ मार्गशिर शु १०
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Digitized by Vaidika Bharata/Suparna Trust, Maujpur, New Delhi.